श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीराममङ्गलाशासनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीराममङ्गलाशासनम् ॥

श्रीमन्मार्ताण्डवंशे दशरथनृपतेरात्मजत्वं प्रपन्नः
    साकं शेषारिसङ्घैर्निशिचरनिवहं संहरिष्यन् सुरार्थे।
गुर्वादेशेन हत्वा पथि रजनिचरीं प्राप्य सिद्धाश्रमं यः
    चक्रे यज्ञस्य रक्षां स दिशतु भगवान् मङ्गलं रामचन्द्रः॥ 1 ॥

राज्यं गच्छन् मुनीनामथ पथि विगलच्छापशल्यामहल्यां
    कृत्वा भङ्क्त्वा भवानीरमणभुजसरोजालयं चापदण्डम्।
पाणौ कृत्वावनेयीं भृगुसुतविजयी भ्रातृभिः प्राप्तदारैः
    योऽवात्सीदात्मपुर्यां स दिशतु भगवान् मङ्गलं रामचन्द्रः॥ 2 ॥

मातुर्वाचा सुमित्रातनयजनकजामात्रमित्रप्रविष्टः
    कान्तारं शान्तचेताः कलशभवमुनेराश्रमं प्राप्य भूयः।
प्रीत्यै तस्य प्रतिज्ञां निशिचरकुलनिर्मूलनायात्तरोषः
    चक्रे यो विश्ववीरः स दिशतु भगवान् मङ्गलं रामचन्द्रः॥ 3 ॥

यस्या भ्राता दशास्यो निशिचरतरुणीं कामुकीं कारयित्वा
    भ्रात्रा तां कृत्तनासां झटिति खरमुखं राक्षसौघं च हत्वा।
मायाशक्त्यैव रक्षोमुषितजनकजः क्लृप्तसुग्रीवसख्यः
    यो जघ्ने वानरेन्द्रं स दिशतु भगवान् मङ्गलं रामचन्द्रः॥ 4 ॥

नष्टां कान्तां विचेतुं दिशि दिशि चलिते वानराणां निकाये
    श्रुत्वा कान्ताप्रवृत्तिं पवनसुतगिरा प्राप्तपाथोधितीरः।

आग्नेयास्त्रानुभावक्षपितमदभरं दीनदीनं नदीनं
    तेने यो मानशाली स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ **5** ॥

मध्येपाथोधि बद्धां झटिति गिरिशतैः सेतुमाढैक्य लङ्कां
    हत्वा सभ्रातृमित्रं रणशिरसि रुषा रावणं दारचोरम्।
कान्तां स्वीकृत्य शुद्धां ज्वलनपतनतः प्राप्य रम्यामयोध्यां
    योऽवात्सीदात्तमोदः स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ **6** ॥

यो नित्यं रामचन्द्रस्तुतिमिति जपति ध्वस्तसर्वारिसङ्घो
    भुक्त्वा भोगानभीष्टानभिनवयशसा पूरयित्वा त्रिलोकीम्।
अन्ते सञ्चिन्त्य कान्ताधनतनयगृहाद्येषु रूढं ममत्वं
    साक्षादालीयतेऽसौ भगवति भवसिन्धुप्लवे चक्रपाणौ ॥ **7** ॥

श्रीराघवं दशरथात्मजमप्रमेयं
    सीतापतिं रघुकुलान्वयरत्नदीपम्।
आजानुबाहुमरविन्ददलायताक्षं
    रामं निशाचरविनाशकरं नमामि ॥ **8** ॥

॥ इति श्रीराममङ्गलाशासनं समाप्तम् ॥